# Vairagya Panchakam

# વૈરાગ્યપઞ્ચકમ્

## Document Information

Text title : vairAgyapanchakam

File name : vairAgyapanchakam.itx

Category : panchaka, misc, sahitya, vedAnta-deshika, vedanta

Location : doc_z_misc_general

Author : Vedanta Desikan

Transliterated by : T. R. Chari

Proofread by : Madhavi U mupadrasta at gmail.com

Latest update : November 17, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2022

*sanskritdocuments.org*

Vairagya Panchakam

# વૈરાગ્યપઞ્ચકમ્

ક્ષોણીકોણશતાંશપાલનકલદ્દુર્વારગર્વાનલ-
ક્ષુભ્યત્ક્ષુદ્રનરેન્દ્રચાટુરચનાં ધન્યાં ન મન્યામહે ।
દેવં સેવિતુમેવ નિશ્ચિનુમહેયોऽસૌ દયાલુઃ પુરા
દાનામુષ્ટિમુચે કુચેલમુનયે દત્તે સ્મ વિત્તેશતામ્ ॥ ૧॥

શિલં કિમનલં ભવેદનલમૌદરં બાધિતું
પયઃ પ્રસૃતિપૂરકં કિમુ ન ધારકં સારસમ્ ।
અયત્નમલમલ્પકં પથિ પટચ્ચરં કચ્ચરં
ભજન્તિ વિબુધા મુધા હ્યહહ કુક્ષિતઃ કુક્ષિતઃ ॥ ૨॥

જ્વલતુ જલધિ ક્રોડ ક્રીડત્કૃપીડ ભવ પ્રભા-
પ્રતિભટ પટુ જ્વાલા માલાકુલો જઠરાનલઃ ।
તૃણમપિ વયં સાયં સમ્ફુલ્લ મલ્લિ મતલ્લિકા
પરિમલમુચા વાચા યાચામહે ન મહીશ્વરાન્ ॥ ૩॥

દુરીશ્વરદ્વારબહિર્વિતર્દિકા-
દુરાસિકાયૈ રચિતોऽયમઞ્જલિઃ ।
યદઞ્ચનાભં નિરપાયમન્તિ મે
ધનઞ્જયસ્યન્દનભૂષણં ધનમ્ ॥ ૪॥

શરીર પતનાવધિ પ્રભુનિષેવણાપાદના-
દબિન્ધનધનઞ્જયપ્રશમદં ધનં દન્ધનમ્ ।
ધનઞ્જયવિવર્ધનં ધનમુદૂઢગોવર્ધનં
સુસાધનમબાધનં સુમનસાં સમારાધનમ્ ॥ ૫॥

(કાચાય નીચં કમનીયવાચામોચાફલસ્વાદમુચા ન યાચે ।
દયાકુચેલે ધનદત્કુચેલે સ્થિતેऽકુચેલે શ્રિતમાકિચેલે ॥)
નાસ્તિ પિત્રાર્જિતં કિઞ્ચિન્ન મયા કિઞ્ચિદાર્જિતમ્ ।
અસ્તિ મે હસ્તિ શૈલાગ્રે વસ્તુ પૈતામહં ધનમ્ ॥ ૬॥

॥ ઇતિ વેદાન્તદેશિકેન રચિતં વૈરગ્યપઞ્ચકં સમ્પૂર્ણમ્ ॥

The verse sequence may differ from print to print.

Encoded by T. R. Chari

Proofread by Madhavi U

*Vairagya Panchakam*

pdf was typeset on June 4, 2022

Please send corrections to *sanskrit@cheerful.com*